## चतुर्थचरणम्, कार्यक्रमः 03

## त्रिदिवसीय-ऑनलाइन-राष्ट्रिय-कार्यशाला

# अभिकल्पनविकासयोः ऑनलाइन-आकलनम्

**(Design & Develop : Online Assessment)**

08-10 जून 2020 पर्यन्तम्

### संक्षिप्तप्रतिवेदनम्

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य बहुआयामिपरियोजना-**पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षकशिक्षण-मिशनमित्यस्य** अन्तर्गतत्वेन स्थापिते **नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये शिक्षणाधिगमकेन्द्रेण** चतुर्थचरणस्य कार्यक्रमाणाम् **'अभिकल्पनविकासयोः ऑनलाइन-आकलनम्'** इति विषये तृतीय-त्रिदिवसीयराष्ट्रियकार्यशालायाः आयोजनम् 2020 तमवर्षस्य जूनमासस्य अष्टमदिनाङ्कात् जूनमासस्य दशमदिनाङ्कं यावत् कृतम्। कार्यशालायाः मुख्योद्देश्यं प्रतिभागिनां विविधानाम् ऑनलाइन-आकलनमुपकरणानाम् विभिन्नोपलब्धानाम् एप्स्-सॉफ्टवेयर्समुपकरणानां परिचयप्रदानम्, तेषाम् अभिकल्पनविकासयोः परिदानसम्बद्धकुशलतानाम् च विकासः करणीयम्। ऑनलाइनकार्यशालायाः सञ्चालनं गूगलमीट इत्यस्य मञ्चे कृतम्। उद्घाटनसत्रस्य शुभारम्भः शिक्षणाधिगमकेन्द्रस्य परियोजनाध्यक्षया **प्रो. अमितापाण्डेयभारद्वाजमहोदयया** स्वागतभाषणं कार्यशालायाः सन्दर्भैः च कृतम्। तदनु **श्रीमुकुलकानिटकरमहोदयानां** (अखिलभारतीयसंघटनमन्त्री, भारतीयशिक्षणमण्डल, नवदेहली) सम्बोधनम्, अध्यक्षीयभाषणं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालस्य माननीयानां कुलपतीनां **प्रो. रमेशकुमारपाण्डेयवर्याणां** च जातम्। **प्रो. के. भरतभूषणवर्येण** (शिक्षासङ्कायप्रमुखः विभागाध्यक्षश्च) धन्यवादज्ञापनेन विहितम्। कार्यशालायाः क्रियान्वयनं विशेषरूपेण अभिकल्पितेषु 18 सत्रेषु कृतम्, तेषु उद्घाटन-प्रबोधन-अष्टप्रदर्शनाधारिततकनीकी-प्रश्नोत्तरसत्रम्, त्रीणि स्वाभ्यास-ऑनलाइन- आकलन-प्रतिपुष्टि- अनुभवकथन- समापनादीनि सत्राणि जातानि। कार्यशालायाम् 507 प्रतिभागिनां पञ्जीकरणं प्राप्तम्, तेषु 329 कार्यशालायाम् आमन्त्रिताः, तथैव 249 प्रतिभागिभिः स्वीयं प्रतिभागस्य प्रतिपुष्टिः प्रदत्ता, परञ्च 228 **प्रतिभागिभिः** कार्यशाला कृता, 21 प्रतिभागिनः व्यक्तिगतकारणेन प्रतिभागं कर्तुं न शक्तवन्तः। 228 प्रतिभागिषु भारतस्य 21 राज्येभ्यः 02 केन्द्रशासितप्रदेशेभ्यः 227 प्रतिभागिनः आसन् तथा च 01 प्रतिभागी सऊदी-अरबतः आसीत्। 21 राज्येभ्यः प्रतिभागिनाम् आन्ध्रप्रदेशतः 12, असमतः 04, बिहारतः 03, गुजराततः 04, हरियाणातः 18, हिमाचलतः 02, झारखण्डतः 01, कर्नाटकतः 05, केरलतः 03, मध्यप्रदेशतः 02, महाराष्ट्रतः 12, मेघालयतः 01, ओडिशातः 05, पंजाबतः 01, राजस्थानतः 22, तमिलनाडुतः 14, तेलंगानातः 01, त्रिपुरातः 07, उत्तराखण्डतः 09, उत्तरप्रदेशतः 37, पश्चिमबंगालतः 09, द्वे-केन्द्रशासितप्रदेशेभ्यः चण्डीगढ़तः 04, दिल्लीतः 50 च प्रतिभागिनः आसन्। कार्यशालाविषये निष्णातानां देशस्य प्रतिष्ठितसंस्थानानां **पञ्चविशेषज्ञानां** कुशलमार्गदर्शनं जातम्। एतेषु सत्रेषु कार्यशालायाः मुख्यविषयाः आसन् ते यथा- ऑनलाइनशिक्षणं संसाधनानां दिशानिर्देशाः, ऑनलाइन-आकलनम् : समग्रदृष्टिः, लघु-दीर्घोत्तरात्मकप्रश्नानां हेतु आकलनोपकरणानि, ऑनलाइन-आकलनम् परिचर्चामञ्चम् च, ऑनलाइन-उपस्थितिः प्रमाणपत्रम्, हॉट पोटैटोज, गूगलफार्म। तकनीकीसत्राणां विषयेषु 07 **दत्तकार्याणि** प्रतिभागिनां प्रदत्तानि। ऑनलाइनपरीक्षणम् अपि प्रशासितम्, तेषु 64% प्रतिभागिनः **षष्टिप्रतिशतात्** अधिकान् अङ्कान् लब्धवन्तः। अन्ते विशेषज्ञानां प्रस्तुतव्याख्यानानां गुणवत्ताविषये ऑनलाइनप्रतिपुष्टिः चतुश्श्रेणीषु कृता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकं च** प्राप्तम्। तथा च तेषां औसतम् 78% 20% 02% **एवं** 00% क्रमशः श्रेणीषु प्राप्तम्। अनेन साकं कार्यशालायाः सन्दर्भे ऑनलाइनप्रतिपुष्टिः 10 बिन्दूनां पञ्चश्रेण्यां प्राप्ता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकम्, असंतोषजनकं** च। एतेषां 10 बिन्दूनां प्राप्तश्रेण्याम् औसतप्रतिशते 75% **उत्कृष्टम्,** 20% **अति-उत्तमम्,** 04% **उत्तमम्,** 01% **संतोषजनकं** च प्राप्तम्। समापनसत्रे परियोजनाध्यक्षया गणमान्यातिथीनां स्वागतं कार्यशालाप्रतिवेदनं च प्रस्तुतम्। तदनु **डॉ. भूषणपटवर्धनहोदयानां** (उपाध्यक्षः, विश्वविद्यालयानुदानऽऽयोगः, नवदेहली) च मुख्यातिथीनां सम्बोधनम्, अध्यक्षीयभाषणं **प्रो. रमेशकुमारपाण्डेयवर्याणां** (कुलपतिः, श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली) च जातम्। शिक्षासङ्कायप्रमुखस्य धन्यवादज्ञापनेन कार्यशाला सम्पन्नतां गता। कार्यशालायाः समापनान्तरं सफलप्रतिभागिनां ई-चित्रावली ई-प्रमाणपत्राणि च मेलद्वारा सम्प्रेषितानि।